International Journal of Sanskrit Research 2017; 3(1): 48-51

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 48-51
© 2017 IJSR
www.anantaajournal.com
Received: 16-11-2016
Accepted: 18-12-2016

**S Sitarama Rao**
Assistant Professor,
Department of Paraskara
Pourohitya, SV Vedic
University, Tirupati,
Andhra Pradesh, India

**Corresponding Author:**
**S Sitarama Rao**
Assistant Professor,
Department of Paraskara
Pourohitya, SV Vedic
University, Tirupati,
Andhra Pradesh, India

# यज्ञीय आज्य-चरुद्रव्ययोःप्राशस्त्यम्

**S Sitarama Rao**

## प्रस्तावना

### उपोद्घातः

सामान्यतयासकलयज्ञियकार्येषुआज्य-चर्वौ अत्यन्त आवश्यक विनियुक्तद्रव्यौभवतः । अतः आज्य-चरुद्रव्यविज्ञानंज्ञात्वाविनियोगःभवतीतिचेत् अत्यन्त श्रेयोदायकमितिमत्वाइमंविवरणं च दीयते ।

### आज्यम्

**कात्यायनः** – घृतमाज्येलिङ्गादिति । तच्चगव्यमेव, महीनांपयोसीतिमन्त्रलिङ्गात्[1] ।

तत्रमुख्यंद्रव्यंगव्यम्आज्यम् । अत्रनियते सामान्यतः प्रतिनिधिः स्यात्[2] इति सूत्रात्मुख्यद्रव्याभावेतत्सदृशंप्रतिनिधेयंभवति । तदाहमण्डनः –

घृतार्थेगोघृतंग्राह्यंतदभावेतुमाहिषम् ।
आज्यंवातदभावेतुसाक्षात्तैलमपीष्यते ॥
तैलाभावेगृहीतव्यंतैलंयत्तिलसम्भवम् ।
तदभवेअतसीस्नेहःकौसुम्भःसर्षपोद्भवः ॥
वृक्षस्नेहोऽथवाग्राह्यःपूर्वालाभेपरःपरः ।
तदभावेयवव्रीहिश्यामाकान्यतमोद्भवम् ॥
भरद्वाजोऽन्यथाप्राहघृतप्रतिनिधिंमुनिः ।
गव्याज्याभावतश्छागमहिष्यादेघृतंक्रमात् ॥
तदभावेगवादीनांक्रमात्क्षीरंविधीयते ।
तदभावेदधिग्राह्यमलाभेतैलमिष्यते ॥[3]

**आज्यप्राशस्त्यम्**

धेनु नवनीतेनउत्पद्यमानंद्रव्यमेवआज्यमित्युच्यते । एतत्सर्वत्र वैदिक कार्यक्रमेषु सामान्यतः हवनाङ्गंउपयुज्यते । प्राधान्येश्रुतिवचनमेवमस्ति –

तेजोऽसिशुक्रमस्यमृतमसिधामनामसि ।
प्रियन्देवानामनादृष्टन्देवयजनम् ॥[4]

इति श्रुतिवचनानुसारंदेवतानांप्रीतिः प्रधान आहारमिवतेजः बलकारीइववर्तते। घृतंस्मृतिः मेधा, जठराग्निप्रज्वलनम्, बलं, आयुःशुक्रवृद्धिः, नेत्रयोः हितंकृत्वातेषांकान्तिंदीयते, एवं च आरोग्य प्रदानं च गृहपीडादिनाशनंकरोति ।

कामेधेनोःसमुद्भूतंसर्वक्रतुषुसंस्थितम् ।
देवानामाज्यमाहारंअतश्शान्तिंप्रयच्छमे ॥

**चरुः**

व्रीहीन्यवान्वाहवींषीति [5] इति सूत्रात्व्रीहीनांयवानां च मुख्यत्वमाहकात्यायनः, तदभावेएतत्सुसदृशंग्राह्यम् ।

हविर्व्रीहिमयंकार्यंयद्वायवमयंभवेत् ।
तयोरभावेश्यामकानीवारावाहविर्भवेत् ॥
वेणुयवागौरसंवाकन्दमूलफलंजलम् ।
सत्यंवाहविरेतेषांयथासम्भवमाहरेत् ॥
प्रतिनिध्यन्तरंसत्यंविज्ञेयंहविरत्यये ।
अतोऽन्यदपिवाग्राह्यंसदृशंधान्यमात्रकम् ॥
न ग्राह्यं सर्वथा माषमसूरदरकोद्भवम् ।
यद्वाव्रीहियवाभावेतुषतण्डुलयोगिनीः ॥
ओषधीःप्रतिगृह्णीयादणुकोद्रववर्जिताः ।
ग्राम्याणांवाभवेद्राम्यमारण्यानामरण्यजम् ॥
यवाभावेतुगोधूमास्ततोवेणुयवादयः[6] । इति ।

**चरुलक्षणम्**

**कात्यायनः**

स्वशाकोक्तविधिस्विन्नोह्यदग्धोऽकठिनःशुभः ।
न चातिशिथिलःपाच्यो न च वीतरसश्चरुः[7] ॥

स्वशाखोक्तेनविधिनापाच्यः । वीतरसोगलितमण्डइत्यर्थः ॥

**चरुप्राशस्त्यम्**

तैत्तिरीयसंहितायांचरुविषये एवं भवति । यथा –यः कामयेतास्मिल्लकबुध्नयामिति स चरुंकुर्वीताग्नेर्घृतंविष्णोस्तण्डुला-स्तस्मात्चरुः कार्योऽस्मिन्नेव लेक बुध्नोत्यादित्योभवति[8] । घृतमस्ययोनिर्घृतेश्रितःइत्यादिमन्त्रवर्णात् । तण्डुलास्तुविष्णोः प्रियाः । येऽणिष्ठास्तान्विष्णवेशिपविष्टाय इति श्रतेः । तस्मादुभय-प्रयत्वात्घृतयुक्तश्चरुः कार्यः। एतेनास्मिल्लेकेसमृद्धोभवतीति (यज्ञकर्तारः) गम्यते ।

**सारसङ्ग्रहे**

अनिर्गतोष्मासुस्विन्नोह्यदग्धाऽकठिनश्चरुः ।
न चातिशिथिलःपाच्यो न च वीतरसोभवेत्[9] ॥

चरुश्रपणार्थंतण्डुल – यव – गोधूमादिधान्यरूपाः भवन्ति ।

**व्रीहिः**

व्रीहयःधान्यविशेषाः[10]।
किंशारुःसश्यशूकंस्यात्कणिकंसस्यमञ्जरी ।
धान्यंव्रीहिःस्तम्बहरिःस्तम्बोगच्छस्तृणादिनः[11] ॥
व्रीहिधान्यविशेषाः
मधुरश्चाम्लपाकश्चव्रीहिःपित्तकरोगुरुः ।
बहुमूत्रपुरीषोष्मात्रिदोषस्त्वेवपाटलः ॥[12]
कषायमधुराःपाकेऽमधुरावीर्यतोऽहिमाः ।
अल्पाभिष्यन्दिनस्तुल्याःषष्टिकैर्बद्धवर्चसः[13] ॥

व्रीहयःकथिताःपाकेमधुरावीर्यतोहिमाः ।
अल्पाभिष्यन्दिनोबद्धवर्चस्काःषष्टिकैःसमाः ।
कृष्णव्रीहिर्वरस्तेषांतस्मादल्पगुणाः परे[14]॥

चरकसंहितानुसारंव्रीहिधान्ये मधुर आम्ल गुणत्वंभवति । पित्तकारत्वं, त्रिदोषकारत्वं च ज्ञायते । सुश्रुतमतानुसारेणव्रीहिधान्यंकषाय -मधुर गुणावदभूत्वावीर्यवृद्धिं-दत्वाउष्णत्वआपादनत्वं च दीयते इति ज्ञायते । भाव प्रकाशानुसारेणमधुरगुणत्वंभवति, वीर्यवृद्धिकारीभवति, शैत्यप्रदोभवति – अल्पाभिष्यन्दित्वमपिदृश्यते ।

**यवधान्यविशेषाः**

यवः धान्य विशेषः[15]
पुंसिमेधिः खले दारु न्यस्तंयत्पशुबन्धने ।
आशुव्रीहिःपालटःस्याच्छितशूकयवौसमौ[16]॥
यवःकाषायोमधुरःशीतलोलेखनोमृदुः ।
व्रणेषुतिलवत्पथ्योरूक्षोमेधाऽग्निवर्धनः ।
कटुपाकोऽनभिष्यन्दिस्वर्योबलकरोगुरुः ।
बहुवातमलोवर्णस्थैर्यकारी च पिच्छिलः ।
कण्ठत्वगामयश्लेष्मपित्तभेदःप्रणाशनः ।
पीनसश्वसकासोरुस्म्भलोहिततृद्व्रणुत् ।
अस्मादतियवोन्यूनस्तोक्मोन्यूनतरस्ततः[17] ॥

यवधान्ये मधुर, शीतं, मृदुकारित्वंभवति । व्रणरोगहरणं, पद्य – रूक्ष – बुद्धि प्रदानत्वशक्तिं च मृदु स्वरदंवर्णकारीवभवति । तथा च त्वक् –कफ – पित्त – मेद– श्वास – ऊरु – स्तम्ब – रुधिरोत्पन्नानां – विकारानांनष्टकारकोभवतीतिज्ञायते ।

**आहुतिप्रदानप्राशस्त्यम्**

सामन्यतयासकलकार्येषुतैः तैः कर्माचरणप्रक्रियासुविहितदेवताः अग्निरूपेण आराध्य तद्वारादेवताप्रीतिं प्राप्य भक्ताः सकलकाम्यानिप्राप्नुवन्ति ।

अग्निमुखावैदेवाःपाणिमुखापितरः इति ब्राह्मणवचनम्[18] ।

इति श्रुतिवचनेनदेवताः अग्निरूपोभूत्वाहवनाङ्गद्रव्याणिस्वी-कृत्यतृप्तिंप्राप्नुवन्ति ।
तद्वद्देवपितरः पाणिकृत श्राद्ध – तर्पणरूपेणद्रव्यंस्वीकृत्यतृप्ताः भवन्तीतिगम्यते ।एवं श्रुतै –

आग्निर्मुखंप्रथमोदेवतानांसङ्गतानामुत्तमोविष्णुरासीत्[19]।

इति देवता समूहेआद्यःअग्निः, विष्णुःउत्तमः, विहितदेवताः तेषांस्थितिमनुसृत्यउत्तमाः विहितदेवताः उत्तमोत्तमाः भवन्ति इति ज्ञायते ।
एतत्कारणात्वयंक्षीरादिद्रव्यंयदर्प्यतेअग्निमुखेनताः देवताः स्वीकृत्यतेषामिच्छाफलानिप्रददति ।
अस्माभिः आचरित यज्ञयागादिअनुष्ठानेनसुप्रीताः देवताः अस्माकंकृतेअभीष्टफलादिकंप्रयच्छन्ति । अयं विषयः श्रुति– गीता वाक्येषु एवम् अस्ति ।

**श्रुतौ**

पूर्णादर्विपरापतसुपूर्णापुनरापत ।
वस्नेवविक्रीणावहाऽइषमूर्जँशतक्रतो[20] ।।

हवनद्रव्याणिआहुत्यनन्तरंसूक्ष्मस्वरूपंधृत्वाद्युर्लोकादीन्गत्वाततःवृष्ट्यादिरूपं प्राप्य भूम्यांपतन्ति । तथा च यज्ञयागादिकर्माणांआचरणेनदेवताः तृप्तिं प्राप्य मनुष्येभ्यः वाञ्चितफलानिअनुगृह्णन्तीतिअवगम्यते । अमुमेवविषयंगीता-यांगीताचार्यैः एवं उक्तम् –

देवान्भावयतानेनते देवा भावयन्तुवः ।
परस्परंभावयन्तःश्रेयःपरमवाप्स्यथ[21]॥

देवताः यज्ञादिकृत्येसन्तृप्ताः सन्तः, भक्तेषुसुप्रीताः भवन्ति । मनुष्याणांदेवतानांमध्येपरस्परसहकारेणसर्वेषांश्रेयोदायकंभवतीति गीतावचनानुसारंज्ञायते ।

## संदर्भ सूची


1. कात्यायनश्रौतसूत्रम् 1.8.37
2. कात्यायनश्रौतसूत्रम् 1.4.2
3. संस्कारगणपति पृष्ठम् 36
4. शुक्लयुजर्वेदकाण्वसंहिता 1.10.49
5. काण्वीय शतपथब्राह्मणम् 14.4.2.5
6. संस्कारगणपति पृष्ठम् 36
7. संस्कारदीपिकःपृ 43
8. तैत्तिरीयसंहिता 5.5.1.5
9. संस्कारगणपति पृष्ठम्3.7
10. काण्वीय शतपथब्राह्मणम् 14.4.2.6
11. अमरकोशः 2.9.15
12. चरकसंहिता 27.15
13. सुश्रुतसंहिता शरीरस्थानम् 46.13
14. भावप्रकाशः धान्यवर्गः 21
15. काण्वीय शतपथब्राह्मणम् 14.4.2.6
16. अमरकोशः 2.9.15
17. भावप्रकाशः धान्यवर्गः 27.29
18. आश्वलायन गृह्यसूत्रम् 4.8.6
19. काठकसंहित 4.16.114
20. शुक्लयजुः काण्वसंहिता 3.57
21. भगवद्गीता 3.11